No. ५६८० घ

Title बटुक भैरव कवचम्

Author +

Extent 2 Age

Subject तन्त्रम् : संपूर्णम्

नं० ५६८०-घ

वरुम वकव मृतेन्द्रा

पत्रे २ (द्वे)

नं० १२२०

5680

F-2 complete

नं० ५६८०-घ
बटुक भैरव कवचम (तन्त्रम)
पत्रे २(द्वावेवौ)
(सम्पूर्णम्)

भै. क. १

ॐश्रीगणेशायनमः नमोवटुकाय श्रीदेव्युवाच भगवन्सर्ववेत्तात्वं
देवानांप्रीतिकारक मंत्रिणांदेहरक्षार्थकारणंकथ्यतांध्रुवम् १ भैरवं
कवचंब्रूहियदिचास्तिकृपामयि प्राणत्यागंकरिष्यामियदिनोकथ
यिष्यसि २ सत्यंसत्यंपुनःसत्यंसत्यमेवनसंशयः इत्यंदेव्याःवचःश्रु
त्वाबृहस्पतिसमप्रभः उवाचवचनंतत्रदेवदेवोमहेश्वरः महेश्वरउवा
च वाटुकंकवचंदिव्यंशृणुमत्प्राणवल्लभे चंडिकातंत्रसर्वस्वंवटुक
स्यविशेषतः ४ तंत्रंमंत्राक्षरंयन्नद्वास्तुदेवस्वरूपकं शंखवर्णोद्विबाहु
र्वैवटुकश्चंद्रशेखरः आपदुद्धारणोनामभैरवःपरिकीर्तितः प्रवक्ष्यामि
समासेनचतुर्वर्गस्यसिद्धिदं प्रणवंकामदंविंद्यालज्जाबीजंचसिद्धि
दं वटुकायेतिविज्ञेयंमहापातकनाशनम् ६ आपदुद्धारणायेतिस्या
पदुद्धारकंन्तृणाम् कुरुद्वयंमहेशानिमोहनंपरिकीर्तितं वटुकायेतिवि
ज्ञेयंस्तंभनंपरिकीर्तितम् लज्जाबीजंतथाविंद्यान्मुक्तिदंपरिकीर्तितम्
द्वाविंशत्यक्षरोमंत्रःक्रमेणजगदीश्वरि गोपनीयःप्रयत्नेनमात्रजारो
पमोयथा ॐअस्यश्रीआपदुद्धारणवटुकभैरवकवचस्य भैरवऋषिः
अनुष्टुप्छंदः आपदुद्धारणवटुकभैरवोदेवता वंबीजं ह्रींशक्तिः प्र
णवःकीलकं श्रीवटुकभैरवप्रीत्यर्थे पाठेविनियोगः सर्वांगेषु ह्रां
वामितिकरषडङ्गः अथध्यानम् करकलितकपालःकुंडलीदंडपा
णिस्तरुणतिमिरनीलोव्यालयज्ञोपवीती क्रतुसमयसपर्याविघ्न
विच्छेदहेतुर्जयतिवटुकनाथःसिद्धिदःसाधकानाम् १ ॐपातुशिर
सिनित्यंपातुह्रींकंठदेशके वटुकायेपातुहृदयेनाभावापदुद्धारणा
यच कुरुद्वयंलिंगमूलेआधारेवटुकायच सर्वदापातुह्रींबीजंबाह्वो
र्युगलमेवच षडंगसहितोदेवोनित्यंरक्षतुभैरवः ॐह्रींवटुकायस

नीदृशं दृष्टे ती०

ततं सर्वांगे मम सर्वदा ॐ ह्रीं कालाय वपुषः पातु वीरासनो हृदि
ॐ ह्रीं महाकालः शिरः पातु कंठदेशे तु भैरवः ॐ ह्रीं दंडपाणि र्गुह्य
मूले भैरवीसहितः सदा ॐ ह्रीं ललितो भैरवः पातुस्पष्टाभिः शक्ति
भिः सह पूर्वस्याम् असितांगो मे दिशि रक्षतु सर्वदा आग्नेय्यां च रुरुः पा
तु दक्षिणे चंडभैरवः नैरृत्यां क्रोधनः पातु उन्मत्तः पातु पश्चिमे वाय
व्यां मे कपाली च नित्यं पायात्सुरेश्वरः भीषणो भैरवः पातु चोत्तरस्यां
तु सर्वदा संहारभैरवः पायादीशान्यां मे महेश्वरः ऊर्ध्वं पातु विधाता
वै रूपनंतो व्याडस्मातले सद्योजातस्तु मां पायात्सर्वतो देवसेवितः वा
मदेवस्तु मां पायाद्वणे घोरे सदावतु जले तत्पुरुषः पातु स्थले घोरः प्र
पातु माम् ईशानश्चांतरिक्षे मे सदा पातु महेश्वरः डाकिनीपुत्रकः पा
तु पुत्रान्मे सर्वदा गृहे हाकिनीपुत्रकः पातु दारांश्च लाकिनीसुतः
पातु मां शाकिनीपुत्रः श्रियं च सततं गिरं पायान्मे मालिनीपुत्रः पशू
न्श्वान्गजांस्तथा महाकालो वतु क्षेत्रं सैन्यं मे कालभैरवः वायंवा
युप्रियः पातु भैरवो भीतिहारकः सहस्रारे महापद्मे कर्पूरधवलो गु
रुः हंसबीजं सदा पातु सोहं रक्षतु सर्वदा प्राणापानौ समानं चैवोदा
नं व्यानमेव च नागं कूर्मं च कृकरं देवदत्तं धनंजयं पंचभूतेषु सर्वेषु
वटुकेशः सदावतु एतत्कवचमीशानि तवस्नेहात्प्रकाशितं चतु
र्वर्गप्रदं चैव भैरवस्य प्रकीर्तितम् वांछितार्थप्रदं चैव स्वयं देवप्रका
शितम् यः पठेच्छृणुयाद्वापि धारयेत्कवचं तु वा सत्यानंदमयो भूत्वा
लभते परमं पदम् यश्चैनं चिंतयेद्विकवचं मन्त्रवोदितम् कोटि
जन्मार्जितं पापं विनश्यत्येव तत्क्षणात् जलमध्येऽग्निमध्ये वा दुर्ज
ये शत्रुसंकटे महाकारागृहे बद्धो लोहशृंखलया नरः मुच्यते

भै॰ क॰ २

2

तत्क्षणाद्देवि सर्वत्र विजयी भवेत् भक्तियुक्तेन मनसा कवचं प्रज
पेद्यदि कामतुल्यः स नारीणां रिपूणां स यमोपमः तस्य पादांबु
जद्वंद्वं राज्ञां मुकुटभूषणं स्यात्तस्य भूतिमालोक्य कुबेरोपि तिर
स्कृतः अस्य विज्ञानमात्रेण मंत्रसिद्धिः पदे पदे अनेन कवचेनैव
रक्षां कृत्वा विचक्षणाः विचरन्यत्र कुत्रापि न विघ्नैः परिभूयते मंत्रे
ण प्रयतो मंत्री कवचं रक्षयेत्सदा तस्मात्सर्वप्रयत्नेन दुर्लभं पाप
चेतसां भूर्जे वा वटपत्रे वा लिखित्वा धारयेन्नरः धारयेत्स जयेद्वापि
पाठयेद्वापि नित्यशः स चाप्नोति फलं सर्वं नात्र कार्या विचारणा
सततं पठते येन वाटुकं कवचोत्तमं प्रत्यक्षो जायते तस्य भैरवो
वटुकः स्वयं जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि वर्णितुं
शक्यते नो यत्तत्फलं पंचभिः कथं मुखैः वक्त्रं महेशानि सत्यं स
त्यं न संशयः इदं कवचमज्ञात्वा यो जपेद्वाटुकं नरः स नाप्नोति फ
लं तस्य परे च नरकं व्रजेत् मन्वन्तरत्रयांतं च तिर्यग्योनिषु जाय
ते इहलोके महारोगी दारिद्र्येणातिपीडितः शत्रूणां वशगो भू
त्वा करपात्रसुभिक्षुकः न देयं पशुलोके भुसारभूतमिदं प्रिये न
देयं परशिष्येभ्यो दुर्जनेभ्यः सुरेश्वरि निन्दकेभ्यः कुशिष्येभ्यो दांभि
केभ्योपि नो कदा देयं पुत्राय शिष्याय शांताय प्रियवादिने कार्पण्यर
हिताया लं वटुके भक्तिरताय च योपरीक्ष्य प्रदद्याद्धि तस्य नश्यंति स
त्वरं आयुर्विद्यायशोधर्मं बलं चैव न संशयः तस्माद्वर्णविभागेन
पूर्वं शिष्यं परीक्षयेत् एकद्वित्रिचतुर्वर्षैः पश्चाद्दद्याद्गुरुः स्वयम्
इति श्रीवटुभैरवकवचं समाप्तम् शिवशिवाभ्यां नमः